# संस्कृतवार्ताः

दिनाङ्क :- 19.08.2026

प्रात: - 06:55

<u>झारखण्ड-परीक्षाः</u>

झारखण्डप्रशासनेन ह्यः रात्रौ छात्राणां विरोधप्रदर्शनस्य मध्ये अनियमितताभिः कारणैः निरस्तानां चतुःचत्वारिंशत्-नियुक्तिपरीक्षाणां सूची प्रकाशिता। अष्ट-अधिसूचनाः प्रकाश्य राज्यप्रशासनेन उक्तं यत् निरस्तासु परीक्षासु चतुर्दशाधिक-द्विसहस्रतमवर्षात् झारखण्डलोकसेवायोगेन तथा टी.पी.डी.एल्. इति टी.एस्.आर्. डाटा प्रोसेसिङ्ग प्राइवेट् लिमिटेड् इत्यनया बाह्यसंस्थया आयोजिताः परीक्षाः सम्मिलिताः सन्ति। निरस्तासु परीक्षासु औषधनिरीक्षकाणां, सहायकप्राध्यापकानां, उपसमाहर्तॄणां, दन्तचिकित्सकानां, सहायकाभियन्तॄणां, व्यवहारन्यायाधीशानां, अतिरिक्तलोकाभियोक्तॄणाम् अथ वनक्षेत्राधिकारिणां च नियुक्त्यर्थं आयोजिताः परीक्षाः अन्याश्च परीक्षाः सम्मिलिता: सन्ति। अन्यासु प्रमुखासु निरस्तासु परीक्षासु प्रशासकीय-पॉलिटेक्निक्-संस्थासु व्याख्यातॄणां, वरिष्ठवैज्ञानिकाधिकारिणां, सहायकवनसंरक्षकाणाम् अथ अन्येषां प्रशासनिक-प्राविधिक-पदानां च नियुक्त्यर्थं परीक्षाः सम्मिलिताः सन्ति। अधिसूचनासु उक्तं यत् जेपीएससी-जेएसएससी इत्येतयोः अनियमितता-सम्बद्धानां प्रकरणानां शीघ्रविचारणाय उच्चन्यायालयं प्रति द्रुतन्यायालयस्य निर्माणाय अनुरोधः करिष्यते। तदतिरिक्तं जेपीएससी-जेएसएससी इत्येतयोः आन्तरिकसतर्कताप्रकोष्ठस्य निर्माणमपि करिष्यते।

<u>ब्रिक्स् - पर्यावरणोपवेशनम्</u>

ब्रिक्स्-देशैः पर्यावरणसंरक्षण-सततविकासस्य क्षेत्रे सहयोगं सुदृढीकर्तुं स्वप्रतिबद्धता पुनः प्रकटिता। नवदिल्ल्यां ह्यः सम्पन्नस्य द्वादश-ब्रिक्स्-पर्यावरणमन्त्रिणां उपवेशनस्य अनन्तरं संयुक्तमन्त्रिस्तरीये वक्तव्ये उक्तं यत् ब्रिक्स्-देशैः सततविकासस्य त्रिंशदधिक-द्विसहस्रतम-वर्षस्य कार्यविधेः, जलवायुपरिवर्तनसम्बन्धिनः संयुक्तराष्ट्रसङ्घस्य रूपरेखाप्रबन्धस्य अथ पेरिस्-सन्धेः च पूर्णप्रभाविरूपेण कार्यान्वयनं प्रगतिशीलं कर्तुं स्वप्रतिबद्धता पुनः दृढीकृता। देशैः बलं दत्तं यत् विकसितदेशेभ्यः वित्तीयसहायतायाः उपलब्धतया सह अन्ताराष्ट्रिय-सहयोगं सुदृढीकर्तुं विकासशीलदेशानां पर्यावरणसम्बद्धानां जलवायुसम्बद्धानां च आह्वानानां प्रभाविरूपेण समाधानम् आवश्यकम् अस्ति। भारतं अस्मिन् वर्षे "सहनशीलतायै, नवोन्मेषाय, सहयोगाय, सततविकासाय च निर्माणम्" इति विषयवस्तुना ब्रिक्स्-सङ्घस्य अध्यक्षतां करोति। ब्रिक्स्-देशानां मन्त्रिभिः सततविकासस्य साधनरूपां चक्रीयार्थव्यवस्थां प्रवर्धयितुं भारतस्य नेतृत्वस्य अपि प्रशंसा कृता।

अमितशाहः - तमिलनाडुयात्रा

केन्द्रीयगृहमन्त्री अमितशाहः अद्य सायं तमिलनाडुराज्यस्य द्विदिवसीययात्रायै चेन्नईनगरं प्राप्स्यति। असौ श्वः चेन्नईनगरस्य समीपे कोवलम् इत्यत्र आयोज्यमाने दक्षिणभारतस्य मुख्यमन्त्रिणां सम्मेलने भागं ग्रहीष्यति। सम्मेलने तमिलनाडु-केरल-आन्ध्रप्रदेश-तेलङ्गाना-पुडुचेरी चेत्येतेषां प्रदेशानां मुख्यमन्त्रिणः भागं ग्रहीष्यन्ति।

राष्ट्रीय-परीक्षण-अभिकरणम्

राष्ट्रीय-परीक्षण-अभिकरणेन स्वस्य परीक्षा-दलस्य व्यापकं पुनर्निमाणं कृत्वा षट्शतं पुरातनान् विशेषज्ञान् निष्कास्य तेषां स्थाने नूतनाः विशारदाः सङ्गृहीताः। शिक्षा-मन्त्रालयेन सामाजिकान्तर्जालीयपटले संसूचितं यत् परीक्षा-पत्राणां सूक्ष्म-परीक्षणं सुदृढं विधातुम् एन.टी.ए.-संस्थया चतुःस्तरीय-प्रश्नपत्र-परीक्षण-प्रणाली कार्यान्विता भविष्यति।

वित्त-मन्त्रालयः

वित्त-मन्त्रालयेन संसूचितं यत् क्षेत्रीय-ग्रामीण-बैङ्क-सङ्घैः प्रवर्तमान-वित्तवर्षस्य ऋण-प्रदान-क्षेत्रे तीव्र-वृद्धिः अङ्किता। मन्त्रालयानुसारं भारतीय-रिज़र्व-बैङ्कस्य 'प्राथमिकता-क्षेत्र-ऋण-प्रणाल्याः' अन्तर्गतं क्षेत्रीय-ग्रामीण-बैङ्कानां प्रदर्शनम् अतीव उत्कृष्टम् आसीत्। एतेषां बैङ्कानाम् आहत्य-ऋण-राशिः दश दशांश त्रीणि प्रतिशतं यावत् वर्तते। यद्धि कीर्तिमानम् अस्ति।

ऋतु-विज्ञान-विभागः

भारत-ऋतु-विज्ञान-विभागेन अद्य पूर्व-पश्चिम-उत्तर-प्रदेशेषु, पूर्व-मध्य-प्रदेशे तथा उत्तराखण्ड-राज्ये कतिपयेषु स्थानेषु अतिवृष्टेः पूर्वानुमानम् प्रकटितम्। एतदतिरिच्य उत्तर-पूर्व-भारतस्य भागेषु, दिल्ली-हरियाणाया-चण्डीगढ-बिहार-छत्तीसगढ़-तटीय-कर्णाटक-हिमाचल-प्रदेश-झारखण्ड-केरल-माहे-उप-हिमालयीय-पश्चिम-बङ्गाल-सिक्किमेषु अद्य अतिवृष्टिः सम्भाव्यते।

॥ इति वार्ताः॥